प्रद्युम्नाचार्य तथा नरसिंहाचार्य स्मारक ग्रन्थमाला

संस्कृतगीतमाला

(संस्कृते स्वैरमनूदितानां सरसदासपद्यानां विविधगीतिकानां च संग्रहः)

- रचयिता -

डॉ. आ. न. बरखेडकरः एम्. ए. पीएच. डी.

न्यायरत्नम्, साहित्यरत्नम्.

संस्कृत प्राध्यापकः — उस्मानिया विश्वविद्यालयः भाग्यनगरम्

प्रद्युम्नाचार्य तथा नरसिंहाचार्य स्मारक ग्रन्थमाला

संस्कृतगीतमाला

(संस्कृते स्वैरमनूदितानां सरसदासपदानां विविधगीतिकानां च संग्रहः)

- रचयिता -

डॉ. आ. न. वरखेडकरः एम्. ए. पीएच. डी.

न्यायरत्नम्, साहित्यरत्नम्.

संस्कृत प्राध्यापकः — उस्मानिया विश्वविद्यालयः भाग्यनगरम्

रामंथापुरस्थ

भारतीयविद्याविकाससमितेः

श्री कृष्णाचार्यस्मारकसंस्कृतमहाविद्यालयस्य प्रकाशनम्

हैद्राबाद.

ऑक्टोबर 1983

प्रकाशकः – भारतीयविद्याविकाससमितिः
१०-१०२ २, गोवर्धननगरम्
रामन्थापुरम्, हैदराबादः ५००९९१
आन्ध्रप्रदेशः

मूल्यम् - रू. ६=००

तिरुमलतिरुपतिदेवस्थानस्यार्थिकसाहाय्येन प्रकाशितमिदं पुस्तकम् ।

This book is published with the financial Assistance of Tirumala Tirupati Devasthanams under their scheme 'Aid to publish Religious books.'

मुद्रकः – श्री. धनंजय वरखेडकरः
सुधामुद्रणमन्दिरम्
उत्तरादिमठप्राकारः बसवनगुडी, बेंगलोर.

समर्पणम्



पितृव्यचरणाः

श्री. वै. प. पू. प्रद्युम्नाचार्याः



पितृपादाः

श्री. वै. प. पू. नरसिंहाचार्याः

प्रकाशकनिवेदनम्

संस्कृतप्रेमियों !

भारतीय विद्या विकास समितिके द्वारा प्रचलित श्री कृष्णाचार्य स्मारक संस्कृत महाविद्यालय का यह पहला प्रकाशन आपके सम्मुख रखने में हमे अत्यन्त प्रसन्नता हो रही है। बालकों में संस्कृत भाषा के प्रति रुचि और आदर उत्पन्न करने में यह पुस्तक सर्वथा समर्थ रहेगा इसमें हमे तनिकभी सन्देह नहीं।

आप सभी इस प्रकाशन का आदर करेंगे और आगे चलकर समिति को प्राचीन भारतीय संस्कृति सभ्यता और चिन्तन का प्रसार करनेवाले इस तरह के साहित्य के प्रकाशन में अपना भरपूर सहयोग देंगे ऐसा मुझे पूरा विश्वास है। धन्यवाद।

वेणुगोपाल शर्मा

अध्यक्ष

दिनांक १६-१०-१९८३ — भारतीय विद्या विकास समिति

विजयादशमी — 10 - 102/2

शके १९०५ — गोखलेनगर, रामन्थापुर, हैद्राबाद.

आमुखम्

संस्कृतभाषायाः प्रचारे प्रसारे च अविरतनिष्ठस्य श्री डॉ. आ. न. वरखेडकरमहोदयस्य प्रतिभायाः उल्लसितमिदं संस्कृतगीतमालानाम काव्यं अतीव रुचिरं कमनीयं च वर्तते। अस्मिन् ग्रन्थे संस्कृते ग्रथितानि गीतानि सुहृदां मनांसि सुष्ठु रञ्जयितुं प्रभवन्ति इति मन्यामहे। भाषा च आसु गीतासु सरसा सरला मनोहारिणी च इयं गीतमाला दिक्षु सौरभं वितन्वाना संस्कृतभाषानुरागिणां मोदाय नूनं कल्पते। अल्पे अस्मिन् पुस्तके अनल्पा कल्पना विराजते। कृतावस्यां न केवलं मौलिकरचना एव भान्ति, अपि तु भक्तिगीतानां दासपदानां च छायानुकरणमपि विच्छुरितं वर्तते।

बालानां मनस्सु संस्कृताध्ययनप्रीतिं पटुतरं उत्पादयितुं एषा रचना भूरि उपकुरुते इति बुधा नूनं न संशेरते। अस्मिन् ग्रन्थे भक्तिः, देशभक्तिः, उद्यमशक्तिः, वीरकार्यरक्तिः, निःश्रेयसमुक्तिः, सदाचारासक्तिश्च समीचीनं स्थानमलंकृत्य बालानां विदुषां च अन्तःकरणानि रसप्रफुल्लानि विदधति इति आशास्महे इति शम्।

प्रो. डॉ. बी. आर्. शास्त्री,
संस्कृतविभागः,
उस्मानिया विश्वविद्यालयः,
हैद्राबाद, आं. प्र.

दिनांकः- १६-१०-१९८३

भूमिका

अर्वाचीनसंस्कृतसाहित्यं बहुमुखं वर्धत इति सन्तोषकार्यंयं विषयः । पाश्चात्यभाषासु देशभाषासु वा या वा नूत्नाः साहित्य-प्रक्रियाः प्रकल्प्यन्ते प्रसाध्यन्ते च, तासां सर्वासामपि सन्निवेशः आधुनिकसंस्कृतसाहित्ये वरीवर्तते । गीतकाव्यमथवा गीतिकाव्यं तास्वन्यतमम् । बहवो ललितकवयः गीतिकाव्यानि विरचय्य देव-वाणीं मण्डयन्ति । एतेषु कविषु डॉ. आ. न. वरखेडकर महोदयाः सुगण्याः ।

गीतिकाव्यानां मुक्तकेष्वन्तर्भावः कर्तुं शक्यते । "मुक्तक मन्येनानालिङ्गितं 'तस्य संज्ञायां कन्' " इति लोचनटीकागतं वाक्यं मुक्तकस्यान्यनिरपेक्षवस्तुत्वं सूचयति । "अनिबद्धं मुक्तकादि" इति हेमचन्द्रः । यथा ग्रीकसाहित्ये महाकाव्यं (एपिक्), गीतिकाव्यं (लिरिक्) इति श्रव्यकाव्यभेदावास्ताम्, तथा प्राचीनभारतीयछन्दोबद्धसाहित्येऽपि प्रबन्धकाव्यं मुक्तककाव्यमिति भेदद्वयमभ्युपगतम् । साहित्यशास्त्रज्ञैः मुक्तकं कलापकं कुलकमिति केचन भेदाः प्रदर्शिताः, परं गीति-काव्यमिति भेदविशेषो न केनाप्युपवर्णिताः । सत्स्वपि गीतगोविन्दादि-काव्येषु गीतिकाव्यं प्रख्यातिकोटिं न संप्राप्तमासीत् प्राचीनभारते । किन्तु देशभाषासु दृश्यमानेषु परिवर्तनेषु गीतिकाव्यस्य प्रचलनं हृदय-ङ्गमम् । प्रबन्धकाव्येषु रूपकेषु वा कविः पात्रसृष्ट्येतिवृत्तं वर्णयति, किन्तु गीतिकाव्येषु प्रायः इतिवृत्तस्य पात्राणां चाभाव एव दृश्यते ।

प्रत्यक्षानुभूतिप्रधानं गीतिकाव्यं कवेरनुभूतौ सरलतया लयात्मिकामभिव्यक्तिं वितरति । अत्र कवेरन्तर्गता भावाः संवेदनार्द्रतामेव स्फुटीकुर्वन्ति । अन्यच्च, किञ्चित् संगीतात्मकत्वमपि गीतिष्वपेक्ष्यम् । रागाधिष्ठितानि गीतगोविन्दादीनि, किन्तु भावसंगीतात्मकानि गीतिकाव्यानि तानि, येषां प्रसार आधुनिकसाहित्ये दृश्यते ।

एतद् भावप्राधान्यं भावतरलत्वं वा इमां 'संस्कृतगीतमालां' व्याप्य तिष्ठति । एते भावाः क्वचिद् भक्तिरूपेण (यथा– रामविलासः, शरणं तव चरणं) क्वचित् तरलशृङ्गाररूपेण (यथा– राधाकृष्णसंवादः, अद्य गोकुले सखेलमच्युतो गतः,– आदि गीतिषु) रसिकमनांसि आवर्जयन्ति । डॉ. वरखेडकर महोदयानां वैदर्भी रीतिः प्राचीनानां कवीनां शैलीं स्मारयति । यत्र तत्र समासनिबद्धा रचनाः वर्तन्ते, किन्तु तासु न ते समासा दुरवबोधाः क्लेशावहा वा । 'निःशेषशिष्यहृदयाकाशकोशगनिशाभूषणाय,' 'विषभाशीविषविषम्,' 'दोषराशिनगनाशकारिहरिपादकमलयुगदास,' इत्यादीनि समासपदानि हृद्यान्येव । किं बहुना तैर्लिखितेषु 'गणेशगद्यम्' 'राघवेन्द्रगद्यम्' आदि गद्येष्वपि समासभूयस्त्वमोजोवहमेव, नोद्वेगावहं वर्तते । ओजस्विन्यपि रचनामधुरतामेवातनोति ।

अन्यच्च डॉ. वरखेडकरमहोदयाः शब्दालङ्काराणामर्थालङ्काराणां च मधुरप्रयोगे निष्णाता इति नात्र संशीतिलेशोऽपि । 'रुचिरे चारुचिकुरे,' 'कालसङ्काशलङ्काधिपनाशशङ्कामुत्पाद्य,' 'मन्ये मरन्दरससुन्दरमिन्दिरेश,' 'मन्दारसुमचयमन्दान्यमधुरससन्दोहसन्तानसन्दा-

नितम्'– इत्यादयः पदसंहतयः कवेरनुप्रासगुम्फनं सलीलं प्रकाशयति । अस्यां गीतमालायां बहूनि कन्नडपद्यानि, मराठीपद्यानि, हिन्दीपद्यानि चानुवादितानि कविना । 'गीतरामायण' इति महाराष्ट्रभाषायामतीव प्रख्यातं जनमानसामन्दानन्दसन्दोहकरं काव्यं सर्वत्र जेगीयते । तस्य कानिचित् पद्यानि सरसमनुवादितानि डॉ. वरखेडकरमहोदयैः । मराठीकन्नडपद्येषु गीयमानेषु या माधुर्यलहरी चेतांसि रञ्जयति सैव माधुरी एतेष्वनूदितेष्वपि पद्येषु गीयमानेषु अनुभूयते रसिकवरैः । एतेषु पद्येषु कामं वाग्वैदग्ध्यं प्रधानमस्ति, किन्तु रस एवात्र जीवितम् इति निश्चप्रचम् ।

संस्कृतभाषाऽपि रम्या, सुललितपदाढ्या, अलङ्कार गुणोपचयै र्हृद्येति महाकाव्येष्विव गीतकाव्येष्वपि प्रतीयते । पुराणमित्येव न साधु सर्वम् । अर्वाचीनकाले विवर्धमाना मुक्तकेषु उद्दीप्ता गैर्वाणी सर्वजनमनोहारित्वमेव आवहतीत्यस्य निदर्शनमेषा गीतमाला । महदेतत्प्रमोदस्थानं यदद्य भारती निजनामधेयमन्वर्थयन्ती मधुरमधुरैः सुगमैः संस्कृतगीतमालागतैः पद्यैः यथा रसिकोत्तंसानां तथा सामान्यजनानामपिचेतः कुसुमानि प्रफुल्लयितुं प्रभवति । अतः एवंविधा मालारचयित्वा भारतभारत्यै समर्प्य डॉ. वरखेडकरमहोदयाः साधुलोकबोधनाय, विबुधवृन्दमोदनाय मङ्गलं चिरमातन्वन्तु इत्याशास्य विरमति ।

दिनांकः २१-९-८३

प्र. ग. लाले,
रीडर, संस्कृतविभागे,
उस्मानिया विश्वविद्यालयः,
हैद्राबाद.

विदुषां संमतिः

श्रीमद्भिः डॉ. आ. न. वरखेडकरमहाशयै रचिता संस्कृत-गीतमाला सादरं मया पठिता महान् आनन्दश्च अनुभूतः। एतस्यां मालायां त्रयः भागाः सन्ति। प्रथमे भागे रचिताः मङ्गलाचरण-श्रीनिवासप्रपत्तिगुरुपरम्परास्मरणपूर्वकाः श्लोका अत्यन्तरमणीयाः। ते रचयितुः गुरुदैवभक्तिं सूचयन्ति। मङ्गलगीतं भगवतः नारायणस्य दशावतारान् संक्षेपेण वर्णयति। द्वितीये भागे भक्तिबन्धुराणि विविधानि गीतानि सन्ति। गानसमये अनुसर्तव्यः लयोऽपि सूचितः। अस्मिन् भागे दृश्यमानानि गणेश-पवनसुत-श्रीराघवेन्द्र-वर्णनात्मकानि गद्यानि त्रीणि सर्वत्ररेण्यस्य पाण्डितीं पदप्रयोगनैपुणीं च प्रकटयन्ति। एतानि गीतानि गायन्तः बालाः परमानन्दं भजन्तः श्रोतॄनपि रञ्जयन्तीति नात्र सन्देहः।

तृतीये भागे सञ्चितानि सङ्कीर्णानि गीतानि हृद्यानि भावगम्भीराणि च सन्ति। कुशलवौ, रामायणपात्राणि चाधिकृत्य लिखितानि गीतानि सहृदयानन्दसन्धायकानि। राधाकृष्णसंवादादयः जयदेवकृतगीतानि स्मारयन्ति। भारतस्वातन्त्र्यसंपादनधुरन्धरं महात्मानं वर्णयदन्तिमं गीतं कर्तुः देशदेशनायकगौरवं व्यनक्ति।

डॉ. वरखेडकर महाशयानां भाषा अतीव मृदुला सर्वसुबोधा च । गेयगीतश्लोकास्सर्वेऽपि अनुप्रासंयुताः धाराशुद्धिशोभिताश्च सन्तः पठितॄणां हृदयेषु रसानन्दामृतं वर्षन्ति, पूर्वमहाकवीनां कालिदासादीनां रचनाभिस्सादृश्यं भजन्ति च । अधुनाऽपि गीर्वाणभाषाया-मेतादृशीं महितमाधुर्योपेतां कवितां कर्तुं दक्षाः कविपुङ्गवा वर्तन्ते इति परममोदभरितान्तरङ्गोऽस्मि । डॉ. वरखेडकरमहाशयाः निरन्तरकाव्य-कल्पनपरायणा भूत्वा गैर्वाणीं वाणीमभिनवैः काव्यालङ्कारैर्भूषयन्त्विति सप्रश्रयं प्रार्थयामि ।

१६-१०-१९८३ डॉ. दिवाकर्ल वेङ्कटावधानी

विजयादशमी कलाप्रपूर्णः

शके-१९०५ हैद्राबाद.

गुञ्जारवः
(किंचिन्निवेदनम्)

मान्याः गीर्वाणवाणीप्रणयिनः

भवादृशां विदुषां तोषाय सादरमुपायनीक्रियमाणेयमामोदिनी सरसा संस्कृतगीतमाला चिरकालं गुरुजनस्मरणगुञ्जारवेण सह कर्णकुहरमाविश्य भक्तिरसमधुस्यन्देन हृदयमानन्दयन्ती नियतमाबालवृद्धानां कण्ठमलङ्करोतु, दिशि दिशि प्रसारयतु च सुलभतां सरलतां मधुरतां च संस्कृतभाषायाः ।

संस्कृतभाषायाः तद्गततत्त्वज्ञानस्य च प्रचार एव जीवनस्य परमं लक्ष्यमिति निर्धार्य धैर्येणार्यमर्यादामनतिक्रम्य आचार्यचर्यया जीवनमतिवाहितवताम्, परःसहस्रान् छात्रान् आवासादिपरिकल्पनापूर्वकमध्याप्य ज्ञानदीपमुद्दीपितवतां ऋषितुल्यानां पितृव्यचरणानां श्री. वै. प्रद्युम्नाचार्याणां, पितृपादानां श्री. वै. नरसिंहाचार्याणां च पुण्यस्मरणं मनसि कुर्वाणः लेशतोऽपि तेभ्यो ममानृण्यं संपादयितुं स्मृतिचिह्नरूपेण बालसुलभप्रमाददूषितामपि यथामति गुम्फितामिमां संस्कृतगीतमालां तेभ्यः सादरं समर्पयामि ।

मह्यमाशैशवं संपोष्य न्यायविद्यामध्यापितवतां कीर्तिशेषतां गतानां मदग्रजचरणानां श्री कृष्णाचार्याणां स्मरणार्थं रामन्थापुरस्थभारतीयविद्याविकाससमिति-नामक संस्थया प्रचाल्यमानस्य संस्कृतमहाविद्यालयस्य प्रथमप्रकाशनरूपेण "संस्कृतगीतमाला" इयं प्रकाश्यतां नीयत इति यत्सत्यं तुष्यति मे चेतः ।

तारुलयललितैर्गीतैः नृत्तनाट्यसंवादादिभिश्च विनायासं विनोदेन बालबालिकानां संस्कृताध्ययने साभिनिवेशा प्रवृत्तिर्जायते इति अनुभूय तदनुगुणं विहितस्य प्रयासस्य प्रथमोऽयमाविर्भावः "संस्कृतगीतमाला" नाम । एवमेव विभिन्नरूपेण सुरसरस्वतीसेवाभिलाषकुसुमानि भविष्यति विकासमासादयेयुरेवेति सामोदमाशासानो भगवन्तं श्रीनिवासं, महितां विधिदयितां चाभ्यर्थये ।

येषां प्रत्नानां नूत्नानां च कवीनां मूलरचना आधारतयोपकल्प्य संस्कृतगीतमालिकेयमाबद्धा तेभ्यो महनीयेभ्यो विनयेन मामकीनप्रामादिकदोषसंभावनया क्षन्तुमभ्यर्थये ।

विषमेऽस्मिन् समयेऽपि धनसाहाय्येन संस्कृतप्रचारकार्ये महोपकारं कुर्वते तिरुमल-तिरुपति देवस्थानाधिकारिवर्गाय कृतज्ञताभावमावेदये ।

आमुखं लिखितवद्भ्यो डॉ. बी. आर. शास्त्रि महोदयेभ्यः भूमिकामारचय्य रचनापरिचयं दत्तवद्भ्यो डॉ. प्र. ग. लाले महोदयेभ्यः, स्वमतविलेखनेनोपकृतवद्भ्यः कलाप्रपूर्ण इति बिरुदभूषितेभ्यो डॉ. दिवाकर्ल वेङ्कटावधानी महोदयेभ्यः च मदीयमाधमर्ण्यं विनिवेदयामि ।

मुद्राराक्षसेन सह सततं संगरे नियुध्य, यावच्छक्यं निर्दोषं पुस्तकमुद्रणं कृतवते भ्रातृजाय सुधामुद्रणमन्दिराधिकारिणे श्रीमते धनंजयाय, तत्सहयोगिभ्यश्च धन्यवादान् वितरामि विरमामि च ।

दिनांक : १६-१०-८३ विद्वज्जनवशंवदः,

वरखेडकरोपाह्वनरसिंहाचार्यसूरिसूनुरानन्दतीर्थाचार्यः

संस्कृतगीतिमाला

मङ्गलाचरणम् ।

श्रीहयवदनाय नमः

लीलालोलविलोकनैः कमलया सानन्दमालोकितं
नीलालोकविलोभनीयवपुषं व्यालोलनीलालकम् ।
लोकैरम्बुजसंभवप्रभृतिभिः संभाव्यमानं विभुं
भूभारोद्धुरभोगिभोगशयनं देवं नमस्कुर्महे ॥

अन्तश्चेतसि सादरं कलयतां कल्याणमातन्वते
सृष्ट्याद्यष्टककारिणे त्रिजगतां नाथाय मायाविने ।
नित्यानन्तगुणात्मने श्रुतिशतैरुद्गीतसद्रूपिणे
मध्वेशाय निरस्तघोरतमसे व्यासाय तुभ्यं नमः ॥

श्रीनिवासप्रपत्तिः

सत्तीरनीरविहरद्विहगाकुलायाः
कूले यमस्वसुरनोकहसंकुलायाः ।
कान्तं ममान्तरवलम्बतु कुञ्जसंस्थं
कान्तायुतं किमपि सद्गुणधाम धाम ॥ १ ॥

मूर्धावनद्धसुमसुन्दरमिन्दिरेशं
वन्दारुनन्दनममन्दमुदां निधानम् ।
वेदैकवेद्यमपनुद्य तमःप्रमादं
विद्यानवद्यहृदयो हृदि चिन्तयेयम् ॥ २ ॥

स्वानन्दतृप्तमतितप्ततपःप्रभाव-
प्राप्यं परात्परमपारगुणाभिरामम् ।
ध्यायामि यामि शरणं शरणं दयायाः
श्रीश्रीनिवासमसमं दिवि देवतासु ॥ ३ ॥

हे नीलनीरदसमान रमाविनोद
जाने न ते कथमहं स्तवनं विदध्याम् ।
वाचस्पतिर्न च विधिर्न च शर्वमुख्याः
पारं प्रयान्ति तव सद्गुणवर्णनाब्धेः ॥ ४ ॥

नाहं प्रभो कलवचोरचनाप्रवीणो
नो वा सुधीजनविनोदनकार्मणज्ञः ।
नैवास्ति मेऽतिवितता प्रतिभा तथापि
देवाधिदेव तव पादरतिर्गरिष्ठा ॥ ५ ॥

मन्ये मरन्दरससुन्दरमिन्दिरेश
जातं विवर्णमरविन्दमिदं न गण्यम् ।
चित्ते चकास्ति पदपद्ममिदं त्वदीयं
यस्मादमन्दसुरसिन्धुमरन्दसान्द्रम् ॥ ६ ॥

वन्दे भवन्तमवनीमखिलामवन्तं
सन्तापतप्तजनतादुरितं हरन्तम् ।
सामादिवेदगदितामितदिव्यरूपं
रामादिरूपधरमज्ञजनैर्दुरापम् ॥ ७ ॥

कर्णे करोतु कमलानिलयो दयालु-
र्बालस्य मे कथनमित्यतिसाध्वसेन ।
श्रीवेङ्कटेशगिरिराजविराजमान
बद्धाञ्जलिर्वचनमेतदुदीरयामि ॥ ८ ॥

मूढोऽस्मि नैव कलये ननु दीनबन्धो
किं वा हिताय भविता किमु चाहिताय
तन्मामुमापतिनुत स्वपदप्रपन्नं
दीनं प्रसादय दृशं नु हिताहितज्ञाम् ॥ ९ ॥

जाने न जातु जगदीश नमामि तुभ्यं
नो वा वदामि तव सद्गुणवृन्दजालम् ।
नैवाचरामि तव पूजनमब्जनाभ
पश्यामि नापि तव मन्दिरमम्बुजाक्ष ॥ १० ॥

पापी भृशं विषयभोगविषण्णचेताः
संसारसारमिति ते चरणं प्रपन्नः ।
सोऽहं तथापि भवता न दयासमुद्र
सर्वात्मना बत कथञ्चिदुपेक्षणीयः ॥ ११ ॥

नानाविधातिविषमाखिलदुःखदाव-
ज्वालावलीजटिलजन्मजराप्रपञ्चे ।
मां त्राहि पाहि करुणाहितदिव्यमूर्ते
न त्वां विना मम गतिर्जगतीह कश्चित् ॥ १२ ॥

योगो न मे विशति चेतसि नापि गीता
गीता त्वया गरुडवाहन गूढभावा ।
वेदान्तवादगहनान्तरिता मतिर्मे
तत्त्वं विवेचयितुमादधते न यत्नम् ॥ १३ ॥

मोहो महानिह विसारिविषप्रवाहे
संसारसौख्यसरितः प्रसरीसरीति ।
येनावशीकृत इव भृशमात्तकामो
नित्यं सरामि विवशो विपयानसारान् ॥ १४ ॥

चित्तं चलं विषयलोलुपमक्षजालं
नालं नियन्तुमवशः पुरुषोऽहमीश ।
तस्मात्कृपां कुरु महामहिमाम्बुराशे
नैराश्यदोषकलुषे मयि दीनदीने ॥ १५ ॥

मामानतं करुणया नयनैर्निरीक्ष्य
निर्यापयाशु शमलं रमया समेत ।
न त्वां विनाऽस्ति जगदीश, दयारसेश
पातुं मनोविवशमाश्रितदीनभावम् ॥ १६ ॥

नैशं तमो बत मनो गहनान्धकारं
नैवालमीश तव तत्त्वपरीक्षणाय ।
नारायणाखिलगुरो भवरोगदूनं
दीनं जनं किमु न पश्यसि जातरोषः ॥ १७ ॥

वन्दे मुकुन्द भवदीयपदाम्बुजातं
नैतं विहाय शरणं मम किञ्चिदस्ति ।
दानाय दानवविमर्दनकार्यदक्ष-
दीक्षां गृहाण कमलेक्षण मोक्षधाम्नः ॥ १८ ॥

जाने जनार्दन मनागपि ते न भाव-
मम्भोजसम्भवमुखैरपि भावनीयम्
श्रुत्या परं सकलकल्यगुणाम्बुराशिं
श्रुत्वा हृदन्तरनुचिन्तयते जनोऽयम् ॥ १९ ॥

उद्विग्नमज्जजनसङ्गतिदूनमेनं
संसारसागरनिमग्नमलग्नदोष ।
भग्नं विधाय विषयाग्निनिमग्नमेतद्
बन्धं मदीयमनसः परिसान्त्वयस्व ॥ २० ॥

सर्वेश मे हृदयगं शमलं विनाश्य
संतोषयाशु वरतत्त्वविनिर्णयेन ।
दीने दयां कलय नाहमिहालमस्मि
हुङ्कारमात्रपरितर्जितदोषसार्थ ॥ २१ ॥

दानी दयानिधिरुदारगुणाम्बुराशि-
र्दुष्टान्तको दुरितनाशकरस्तथेति ।
याचे विकुञ्चितमुखो रचिताञ्जलिस्त्वा-
मह्नाय वह्निरिव नाशय मामकाघम् ॥ २२ ॥

रामा रमा तव मनोरमरूपराशेः
सन्दर्शनाय सततं तृषिता यदास्ते ।
ब्रह्मादयोऽपि सभयोदयमभ्युपेताः
देव स्तुवन्ति भवते, क नु मे स्थितिः स्यात् ॥२३॥

दूनोऽसि यद्यमितविक्रम चेतसि त्वं
दृष्ट्वा दुरन्तदुरितानि मया कृतानि ।
श्रुत्वा शिशोरिव वचस्तदिदं मदीयं
रोषं विहाय सहसा तरसा प्रसीद ॥ २४ ॥

न मनागपि नाम विभाति विभो
करुणा मयि ते विनते नु कथम् ।
वितथं कथनं तु कथं श्रुतिभिः
प्रथितं प्रभवेदवधारय माम् ॥ २५ ॥

रभसादपसारय मे दुरितम्
सहसा प्रतिसारय मे तिमिरम् ।
तरसा परिसान्त्वय तत्त्वदृशा
महसा सततं परिपालय माम् ॥ २६ ॥

श्रीगुरुपरंपरास्मरणम्

पातुं दिव्यं पय इव परं निर्मलं ज्ञानरूपं
प्राप्तैर्देवैरपि पुलकितैरादरेणोपगीतः ।
पद्मासद्मायितमधुभिदः पादपद्मोपजीवी
पूर्णप्रज्ञः परमकरुणापूरितः पातु नित्यम् ॥

* * *

अध्यक्षीकृतदिव्यधामविभवान् वेदान्तविद्यानिधीन्
अन्तर्ध्वान्तदिवाकरान् स्वयशसा संपूरिताशान्तरान् ।
दुर्वादीन्द्रवचोविधूननकलाबद्धादरानादरात्
सत्यध्यानयतीन् सदा खलु महानन्दाय वन्दामहे ॥

* * *

सत्यानवद्यवरशास्त्रं वितत्य भुवि सत्यापतेर्गुणगणान्
सत्यापयन् विपुलमत्या तथा कुमतिहत्याकरेण वचसा ।
नित्यातिशायिरतिमत्या श्रिया सरसरीत्या निषेवितपदे
सत्ये रतो जयति नित्यं स्वशिष्यहृदि सत्यप्रमोदयतिराट् ॥

आनन्दतीर्थहृदयानन्दकन्दहरिपादारविन्दरतिमन्
वन्दारुसाधुजनमन्दार मन्दमतिवृन्दावनाखिलगुरो ।
वन्दामहे महितमिन्दीवरप्रकटसौन्दर्यमन्दिरमिदं
वन्द्यं पदद्वयममन्दं मुदे सपदि सत्यप्रमोद भगवन् ॥

आशासु संविशति सर्वासु तावकयशोराशिरेष भगवन्
भाषासु दिव्यसुरयोषोदितासु गतदोषा भवद्गुणकथा ।
भूषा भवान् भुवनकोशस्य दोषचयनाशाय भूरिमहिमन्
रोषं विहाय कुरु साशं मनो मम निराशां निरस्य कृपया ॥

निःशेषशिष्यहृदयाकाशकोशगनिशाभूषणाय गुणिने
काषायवस्त्रवरवेषाय साधुजनतोषाय दिव्यमहसे ।
पाषण्डवादिमतनाशाय मध्वमतपोषाय दूरतमसे
सत्यप्रमोदयतिभूषाय नित्यजितरोषाय ते मम नमः ॥

सच्छास्त्रचिन्तने दद्यात्स्फूर्तिं विद्याविधायिनी ।
सत्यप्रमोदतीर्थानां मूर्तिरार्तिविनाशिनी ॥

* * *

वेदविद्यानवद्यांस्तान् हृद्यचर्याविभूषितान् ।
प्रद्युम्नार्यानहं वन्दे सद्यो विद्यागुरून् मम ॥

पावनं पावनं शास्त्रमाश्रित्य प्रतिभायुतान् ।
पितृपादान् नृसिंहार्यान् वन्दे बुद्धिविशुद्धये ॥

वेदाद्यध्ययनं विधाय विधिना विद्याधिवासायितान् ।
यान् सद्ध्यानयतिर्धियाऽतिलसितान् स्वाध्यायमध्यापयत् ।
श्रीमन्मध्वमतप्रचारणविधौ ये भूरि बद्धादरा-
स्तानद्धा प्रणतोऽस्मि वद्धमधुरश्रद्धाभरो मद्गुरून् ॥

आहिताग्नीनहं वन्दे बाळाचार्यान् समादरात् ।
भ्रातृपादान् सदा शास्त्रसुधापानक्रियोत्सुकान् ।

तर्कशास्त्रवचोगर्वं गलितं कुर्वते भृशम् ।
भ्रात्रे प्रशस्तचर्याय कृष्णाचार्याय मे नमः ॥

* * *

मंगलगीतम्

नाकिलोकनायकाय वेदसंघरक्षकाय ।
दिव्यमीनरूपाय सर्वमंगलम् ॥

मन्दरोद्धारकाय सर्वलोकपालकाय ।
धर्ममूलकूर्माय सर्वमंगलम् ॥

देवसंघतोषकाय दोषराशिनाशकाय ।
यज्ञरूपसूकराय सर्वमंगलम् ॥

नित्यभक्तशुभकराय दैत्यराजभीकराय ।
नारसिंहरूपाय सर्वमंगलम् ॥

बटुकवेषधारकाय बलिमदापहारकाय ।
अदितिजातबालकाय सर्वमंगलम् ॥

क्षात्रगर्वनाशकाय शर्वपूर्ववन्दिताय ।
परशुरामरूपाय सर्वमंगलम् ॥

पूर्णसर्वकामाय जनकजाभिरामाय ।
रघुकुलाब्धिसोमाय सर्वमंगलम् ॥

बालगोपसुन्दराय राधिकामनोहराय ।
नंदगोपनंदनाय सर्वमंगलम् ॥

साधुलोकबोधकाय विबुधवृन्दमोदकाय ।
बुद्धनामधारकाय सर्वमंगलम् ॥

कलिमलापहारकाय दुष्टजनविनाशकाय ।
कल्किरूपधारकाय सर्वमंगलम् ॥

मङ्गलं भगवान् विष्णुः मङ्गलं मधुसूदनः ।
मङ्गलं पुंडरीकाक्षः मङ्गलायतनं हरिः ॥

(लयः- मंगलम् जयमंगलम्)

मङ्गलम्, जयमङ्गलम्,
वरवैकुण्ठद लोकपते, वरवेंकटगिरि भूमिपते
वरसूकरमनु स्वामिपुष्करिणीतीर विराजितसाधुगते ॥
मङ्गलम् जयमङ्गलम् ।

गहनवनीमनुयातवते
विविधवेषधरमूर्तिमते ।
सरसिजाक्षिजनदर्शनतो
मनसि मोहमुपयातवते ॥ मङ्गलं जयमङ्गलम् ।

गगनराजपुरमाप्तवते
सुजनमनोहररूपवते ।
पद्मावतीसुविवाहमहो-
वरवेशविशोभितधामवते ॥ मङ्गलं जयमङ्गलम् ।

अमितसाधुगुणपूर्तिमते
सकलदेवनुतमहिमवते ।
विमलमध्वमुनिराजमनो-
जलजातविराजितमूर्तिमते ॥ मङ्गलं जयमङ्गलम् ।

(लय: :-कलियुगदोळु हरिनामवु नेनेदरे कुलकोटिगळु उद्धरिसुववू)

कलयसि यदि हरिनाम कलौ हृदि कुलकोटिमलं परिहरसि ।
सुलभममलसुखमनुभव मनुभव जलरुहनाभं स्मर मनसा ॥

स्नानममलमथ मौननियममपि
ध्यानविधानं नहि जाने ।
मैवं चिन्तय सपदि महापदि
राममपारं स्मर मनसा ॥

अर्चनमुपहतमुच्चसुखं नहि
तुच्छतमं स्वं मा मंस्था: ।
अच्युतगुणसंघातममुं बत
मत्स्यरूपिणं स्मर मनसा ॥

जपमथ मन्त्रचयस्य तपो वत
पापपरोहं नहि जाने ।
अपारमहिमश्री पुरन्दरविठ्ठलं
उपायतो ननु स्मर मनसा ॥

(लयः– नेरे नंबिदे मद्हृदयमंटपदोळु परिशोभिसितिरु पांडुरंग)

सुरसेवित मम मनसि विलस बहु
सदयोदयमयि पांडुरंगऽऽ ।
विनतसुजनसंसारमहाभय-
हरण सदयमव पांडुरंगऽऽ ॥

सत्स्वपि बहुषु जनेषु मनो मम
भवतु रतं त्वयि पांडुरंगऽऽ ।
भवतु सर्वमपि कर्म सदा मम
तव पूजनमयि पांडुरंगऽऽ ॥

कमलालय तव विमलकथा मम
विलसतु चेतसि पांडुरंगऽऽ ।
विषयाशीविषविषमुपशामय
परपथमुपदिश पांडुरंगऽऽ ॥

सुखमस्त्विह बहु दुःखमस्तु वा
त्वमसि सखा मम पांडुरंगऽऽ ।
निखिलान्तर्गत व्यासविठल तव
मुखमुपदर्शय पांडुरंगऽऽ

(लयः- डी डी आड्याने रंग, डी डी आड्याने)

डी डी खेलसि रे रंग, डी डी खेलसि रे ।
धावं धावं बालललाटे डी डी डी डी डी डी डिक्किति
डी डी खेलसि रे रंग, डी डी खेलसि रे ॥

तेजोराजितवज्राभरणे नानाविधवरमणिगणकिरणे
मुकुटे विलसति सति कमनीये
सरसिजसममृदुपदमाधत्से ॥ डी डी ॥

चन्द्रशेखरहंसवाहनविनुत गृहान्तरमध्यद्वारे
वारं वारं विचरसि सततं
सरसमलक्षितगतमुपयातः ॥ डी डी ॥

प्रत्यावृत्तो धावं धावं जातु निलीनो दूरदेशे
रमते विजयीविठ्ठलराजः
निनदन् तिरिरी तिरिरी री इति ॥ डी डी ॥

❋ ❋ ❋

(लयः– यमुनातीरके बन्निरे सखियरे)

आगच्छत बत यमुनातीरे ।
सुन्दरि नीले, कमलिनि, विमले, मदने, कमने,
विशालनयने ! आगच्छत बत यमुनातीरे ॥

गत्वा स्नात्वा गौरीं नत्वा
नमत मुकुन्दं स्मरत मुकुन्दम् ॥

फुल्लमल्लिकामालां कृत्वा
कृष्णमर्पयत कृष्णमानमत ॥

ध्यात्वा नत्वा दोषान् हित्वा
गायत सततं श्रीपतिचरितम् ॥

जित्वा नियतं चपलं चित्तं
ध्यायत सततं कमलादयितम् ॥

* * *

(लय:— कृष्ण नी बेगने बारो)

गोपाल पालय दीनम्
दर्शय वदनम् ।
एहि मुकुन्द मुरारे
दर्शय भुवनम् ।

पादनूपुरनादऽऽ नाट्यमनोहरऽऽ
नीलजलदसमनीलतनोऽऽ हे ।
दिव्यपीताम्बर करधृतवेणो
गन्धसुगन्धित गुणगणसिन्धो ॥गोपाल॥

कटितटभूषण भूषितवपुषा
कण्ठतटे धृतनववनमालऽऽ ।
मातरमुदरे दर्शितमखिलं
जगदुरुबल श्रीपुरन्दरविठलऽऽ ॥गोपाल॥

* * *

भज रे गोपालम् ।
धृतवनमालं रासविलोलम् ॥

यदुकुलजातं त्रिभुवननाथम्
श्रुतिशतगीतं घननीलम् ॥

बहुकमनीयं मुनिगमनीयम्
सुरनवनीयं कललीलम् ॥

प्रणवनिनादं वेणुविनोदम्
कृतपरमोदं पशुपालम् ॥

रासविलासः

सरति मनो मम दूनम्
सरमपरं भुवि नूनम् ॥
विभाति गगने बोधितमदने शशिनि सुधासदने ।
मधुरविनोदं समुदितमोदं मधुरिपुमात्तरसम् ॥
यमुनातटगतकुंजनिवासं
मधुरमनोहरसालसहासम् ।
नवनीरदसमसुन्दरमासं
विरचितमोहकरासम् ॥
कयापि समदं चुम्बितवदनं मदनाबाधितया ।
कयापि सरसं वेष्टितवपुषं मधुरालोकनया ॥
रुचिरालकनिचयांचितभालं
पशुपनितंबवतीजनकामम् ।
वननीरजसुमगुंफितमालं
विरचितवेणुनिनादम् ॥
मनोजवशया कयापि रुचिरं चंचललोचनया ।
मुदा सरभसं मीलीतनयनं सुरतानन्दितया ॥
स्मितसुन्दरवदनं सितदन्तं
निधुवनकेलिकलासकलज्ञम् ।
मदनविलोलवधूजनकान्तं
मुनिजनचित्तनिवासम् ॥

शरणं तव चरणम्

मधुमथन, नतोऽहं तव चरणम् ।
नवनलिनसमं, भवभयहरणं, सुरमथन, नतोऽहं
तव चरणम् ॥

भाति सकलमिदमिह संसारे
भासा तव निखिलेश ।
जीवति जीवो जगति जनार्दन
तव वशगो नियतम् ॥
भक्तिभरेण भणामि हरे मम शरणं तव चरणम् ॥

वाति वायुरयमवनिरियं बत
चलति तवैव निदेशे ।
नयति नीरमपि नदी निरन्तर-
मयि यमिता भवता ॥
ईश, तवैव दया भवतरणिः, शरणं तव चरणम् ॥

श्रुतिशतसमुदितगुणगणजलधे
सकलसुरार्चित, लोकपते ।
पाहि पाहि करुणारसमन्दिर
पावन, पापरतम् ॥
मुनिजनहृदयनिवास रमाधर शरणं तव चरणम् ॥

[लय:- रिमझिम पाउस पडे सारखा यमुनेला ग ऊर भरे ।
पाणि च पाणी चोहींकडे, ग बाई गेला मोहन कुणीकडे ॥]

सततं वर्षति जलदो नितरां
यमुना प्रवहति जलपूर्णा ।
सर्वतोऽखिलं स्थलं जलमयं कुत्र गतो मोहनरूपः ?

वटदलपुटके शयानममलं
बालमुकुन्दं कलरशनम् ।
आश्लिषेयमहमुरुभूषणमयि कदा मुदा दरहासरसम् ॥
कुत्र गतो मोहनरूपः ॥

नाहमुत्सहे गन्तुमन्यतो
नापि कर्तुमयि गृहकार्यम् ।
दामबन्धमपहाय निर्गतो याति कथं हा शिशुरेषः ।
कुत्र गतो मोहनरूपः ॥

अङ्कगतोऽयं तिष्ठति बालो
गोष्ठगतो वा नैवासौ ।
यत्र तत्र सर्वत्र शोधितो नैष दृश्यते घननीलः ।
कुत्र गतो मोहनरूपः ॥

(लयः– नादान जीव माझा घाबरला हो घाबरला
चला पाहू वेणू कुठे वाजला) ॥

नादेन चित्तमति भीविकलं भो बहुचपलम्
चल सखि यामो वने वेणुकम् ॥

गुरुजनसेवाचरणरताऽऽसं
पाकं तथा च बहु कुर्वाणा, सखि कुर्वाणा,
चल, सखि, यामो वने वेणुकम् ॥

मथितमिवासीद् दधिनवनीतं
मन्था करेण न हा चलिता सखि सा दलिता,
चल सखि यामो वने वेणुकम् ॥

पुलकयुतासीन्मम तनुरेषा
श्लिष्टा यदा सखि सा हरिणा कमलापतिना,
चल सखि यामो वने वेणुकम् ॥

राधिके, चारुगतिके, शमय मे मानसं तापम्,
ललने हंसगमने।

विधुसममलं मधुमयमलसं
लसति नवं यौवनम्,
वपुषि विलसितं मदनविकसितं
सरसमसन्तुलितम् ॥
चलने, लोलनयने मनो मे तेनुजिगमिषते ॥

यदि तव वदनं विचलितमदनं
भवति पुरो विमलम्,
शृणु सखि, वचनं मम कलरचनं
विधुरपि याति लयम् ॥
अलसे, कामसरसे, शेरते कापि रतिरमले ॥

रतिपतिजननं विरतिविशसनं
रचयति ते दर्शनम्,
अतिमतिविभवादरचितवचनं
विलसति ते सूचनम् ॥
रुचिरे, चारुचिकुरे का नु ते वर्णना वनिते ॥

प्रमदय सदयं मम मृदुहृदयं
रसनिलयं दयिते
दुरितविरहितं मनसिजसहितं
सपदि निधाय दृशम् ॥
अवशे, भावविवशे, पाहि मामाशु मदकलुषे ॥

[लयः— आज गोकुळात रंग खेळतो हरी]

रंगखेलने रतः स रासलासको
याहि राधिके द्रुतं पिधाय ते मुखम्
चोरयत्यसौ मनो विनोदलालसो
गोपगोपिकासखो मुकुन्दनामको
रूणद्धि मां बलेन नूनमाशु गोपको
याहि राधिके मुधा न तस्य दृक्पथम् ॥
अद्य गोकुले ललन् स रासलासको
याहि राधिके द्रुतं पिधाय ते मुखम् ।
कापि गोपिका यदा मुधैव कोपिनी
याति नैष जातु शान्तिमाशु कोपतो,
न तोषमेति रोषदोषदूनमानसो
याहि गूढमाशु ते गृहं नु राधिके ॥
रंगखेलने रतः स रासलासको
याहि राधिके द्रुतं पिधाय ते मुखम् ।
कामकेलिसद्विलासहासशोभितो
विभाति रासलास एष रागरंजितो
विना मुकुन्दमङ्गना न कापि राजते
याहि राधिके वपुः पिधाय कोपने ॥
अद्य गोकुले ललन् स रासलासको
याहि राधिके द्रुतं पिधाय ते मुखम् ।

(लय:- आज गोकुळात रंग खेळतो हरी
राधिके जरा जपून जा तुझ्या घरी)

अद्य गोकुले सखेलमच्युतो गतो
राधिके मुखं पिधाय याहि ते गृहम् ॥ ध्रु ॥

सैव घोरचित्तचोरपादधोरणी
सङ्गतो भयं करोति रङ्गरञ्जितो
रङ्गरङ्गरिङ्गणे गुलाललालितो
दिश्यते मयाऽधुना धुनीहि मा शिरो
राधिके मुखं पिधाय याहि ते गृहम् ॥

कथय श्यामसुन्दराय किं तु वर्तते
कोनु रङ्गरञ्जितो न जातु जायते
सर्व एव रङ्गरङ्गरङ्गरञ्जितो
नूतमेकला कथं विहाय सा गता
राधिके मुखं पिधाय याहि ते गृहम् ॥

पश्य रासरिङ्गणेष्वनङ्गराजितो
गोपगोपिकायुतो विभाति यादवो
ध्वन्यते 2 मृदङ्ग एष मन्दिराङ्गणे
वंशिका विरौति परं सैव सर्वतो
राधिके मुखं पिधाय याहि ते गृहम् ॥

(लयः– भाग्यदा लक्ष्मी बारम्मा, नम्मम्मनि
सौभाग्यदा लक्ष्मी बारम्मा)

भाग्यदा लक्ष्मी एतु चिरम्, मम सदने
सौभाग्यदा लक्ष्मी एतु चिरम् ॥

पदे पदे मृदुपादं दधती नूपुरनादं कलं विदधती
सज्जनविहिते पूजासमये तक्रादिव मृदुनवनवनीतम् ॥

एहि कुर्वती कनकावृष्टिं एहि कुर्वती कामितसिद्धिम् ।
दिनकरकोट्याधिकं लसन्ती जनकराजतनुजाते शीघ्रम् ॥

यत्र तत्र मा याहि सुभद्रे भक्तगृहे स्यान्नित्यमहस्ते ।
सत्यधारणं कुर्वती सतां चित्ते चंचसि पुत्तलिका त्वम् ॥

संख्याहीनं भाग्यं ददती कंकणमपि करयुगे वहन्ती ।
कुंकुमांकिता पंकजनयना वेंकटरमणहृदंकितवासा ॥

शर्कराघृतं प्रवाहयन्ती शुक्रवासरे पूजासमये ।
चक्रधारिवरविक्रमसत्कृतधीरपुरन्दरविट्ठलमनोज्ञा ॥

पवनपुत्रगद्यम्

अनवरतरामनामस्मरणरणितनिर्मलान्तरङ्गाय,
ज्ञानविज्ञानबलधैर्यशौर्यवीर्यवैराग्यादिनैकगुणग्रामाय,
निरतिशयितभगवद्भक्तिभावभरितचेतसा,
निजमहसा,
तरसा सलीलं सलिलनिधिमुलङ्घ्य,
कालसङ्काशलङ्काधिपनाशशङ्कामुत्पाद्य,
परमरमणीयरामरमणीचरणनिषेवणेन समुत्पद्यमान-
मन्देतरानन्दसन्दोहतुन्दिलाय,
श्रीमद्रामचन्द्रपदारविन्दमिलिन्दाय,
अञ्जनादुःखभञ्जनाय,
सुजनमनोरञ्जनाय,
पवननन्दनाय,
बलवते,
हनूमते,
नमस्ते नमस्ते नमः ।

जयति जयति पवनो महामनाः
रजतपीठपुरभूरतिरुचिरा ।
कृष्णमूर्तिवरमन्दिरमधुरा
जयति जयति पवनो महामनाः ॥

व्यासदासमहिमा तव विपुलः
दुरितसमूहनिवारणनिपुणः ।
दुर्मतिमोहविधूननकुशलः
भाति सदा भुवने गुणपूर्णः ॥

जनकसुतासंदर्शनशक्तः
कपिवरसंकटहरणे सक्तः ।
रामचन्द्रपदपंकजभक्तः
जातः पूर्वं हनुमन्नामा ॥

आर्तराष्ट्रमनसो भयदाता
मानसरागद्वेषविजेता ।
कृष्णभक्तिरसपूरितचेताः ।
भीमो जातस्ततो द्वितीयः ॥

ज्ञानकर्मभक्तीनां तत्त्वम्
जडजीवात्मकजगतः सत्त्वम् ।
दर्शयितुं सुजनेभ्यस्तत्त्वं
मध्वो जातस्ततो यतीशः ॥

भज वायुसुतम्

भवभीतिहरं भवभूतिकरं
सुरवैरिविनाशकरम् ।
अनुचिन्तय चित्त चिराय वरं हनुमन्तमनन्तबलम् ॥

सुखदं वरदं [२] जनजीवनदं
रघुनाथपदे निरतम् ।
अनुचिन्तय चित्त चिराय वरं हनुमन्तमनन्तबलम् ॥

सुरसौख्यकरं कलिदुःखकरं
कुरुवंशविनाशकरम् ।
द्रुपदात्मजया सहितं महितं भज भीममनन्तबलम् ॥

बलदं धनदं [२] जनजीवनदं
यदुनाथपदे निरतम् ।
अनुचिन्तय चित्त चिराय वरं बलभीमममन्दधियम् ॥

श्रुतिगीतगुणं परिपूर्णमतिं
प्रतिपादिततत्त्वततिम् ।
विरतं विषये निरतं यदुपे भज मध्वमुनिं सततम् ॥

मतिदं धृतिदं [२] जनजीवनदं
वरव्यासपदे निरतम् ।
अनुचिन्तय चित्त चिराय वरं गुरुमध्वमुनिं यमिनम् ॥

[लयः- कोडु बेग दिव्यमति सरस्वति]

मयि धेहि दिव्यमतिं सरस्वति
मयि धेहि दिव्यमतिम् ।
भवमुखसुरवरवन्दितचरणे
द्रुतमुपलालय मामजमानिनि ॥

अखिलविद्याधिदेवि पद्मजभामिनि
मामवबोधय निगमनिवासिनि ॥

भुवनपतेरपि प्रथमवधूरसि
नाम तवास्तु सदा मम वदने ॥

पतितपावनि देवि, दोषविनाशिनि
दर्शय जननि पुरन्दरविठ्ठलम् ॥

* * *

(लयः - पार्वति पालिसेन्न)

पार्वति पालय मां मानिनि देवि ॥ धृ ॥

पार्वति सुरवरवन्दितचरणे
सुरपतिगजमुखदैवतमातः ।
मनसि सदा मम विहर दयामयि
कुरु मयि करुणामंबुजनयने ॥

मंगले पशुपतिपूजितहरिपद-
पंकजसंगिनि पन्नगवेणि ।
गुणपूर्णवेणुगोपालविठ्ठलकं
दर्शयसे ननु शंकरभामे ॥

* * *

प्रणमाम्यहं जयार्यम्

वैराग्यभाग्यवन्तं जातं कुले शुचीनां
श्रीभारतीप्रसादादासादितावबोधम् ।
श्रीपूर्णबोधगुरुणा सानन्दमनुगृहीतं
मलखेडवासमार्यं प्रणमाम्यहं जयार्यम् ॥

हृद्यानवद्यविद्याविद्योतितान्तरङ्गं
निर्धूतहेयसङ्गं सद्यःकृताघभङ्गम् ।
शेषांशमंशुमालापरिवीतदिव्यदेहम्
इन्द्रावतारमार्यं प्रणमाम्यहं जयार्यम् ॥

व्यासानुसारि भाष्यं श्रीव्यासशिष्यरचितं
व्याख्याय भुवि बुधानां बोधाय बहुगभीरम् ।
संसारसारभूतं हरिपादनीरजातं
सेवन्तमार्यचर्यं प्रणमाम्यहं जयार्यम् ॥

सच्छास्त्रसारभूतां सुयमीन्द्रवृन्दगीताम्
गम्भीरभावभरितां दिव्यावबोधनिचिताम् ।
श्रीमत्सुधां बुधानां मोदाय चादधानं
सर्वज्ञकल्पमार्यं प्रणमाम्यहं जयार्यम् ॥

गणेशगद्यम्

जय जय जय गजवदन हेरम्ब जगदम्बामुखाम्बुरुहदिनमणे गणपते !

त्वां हि हठोद्धुतविकटजटाजूटगलद्गगनगङ्गासमालिङ्गिताङ्गस्य, ललाटतटनेत्रपुटनिष्ठ्यूतकृपीटयोनिच्छटासंस्पृष्टचटचटायमानब्रह्माण्डकटाहस्य, उद्भटनटनगतिगलितकटिपटस्य प्रकटास्यहास्यनिकटस्थपार्वतीपुरटपटसंवेष्टितस्य नटवरस्य, इन्द्रचन्द्रनगेन्द्रनागेन्द्रमुखप्रमुखवह्निमुखमुखोद्गीर्यमाणनैकगुणगणस्य, प्रभोः सकलविकलजनमननजनितपरमकरुणावरुणालयस्य कैलासवासस्य भस्मभूषितवपुषो महादेवस्य शिवस्य, पत्युरपारप्रेमरसपूरपूरितान्तःकरणायाः, सकलदुरितहरणनिपुणायाः, सर्वजनशरण्यायाः ससंरम्भं जम्भारिसंबोधितरम्भाद्यम्भोजवदनासम्पादितपूजासंभारसंभावितायाः जगदंबायाः पार्वत्याश्च, दाम्पत्यप्रेमफलीभूतः परमानन्दकन्दो नयनानन्दनो नन्दन इति वन्दनावनतकन्धराः सिद्धगन्धर्वकिन्नरादयः सानन्दं नमन्ति ।

सकलसुरारिनाशन विघ्ननाशन मोदकाशन विनायक विभो ! विलासालससरससुरविलासिनीमृदुलकरकमलनिषेव्यमाणचरणकमलयुगलाय, विनतसुरासुरवरपुरटकिरीटकोटिसंघट्टिताङ्गुष्ठस्पष्टनखनिष्ठ्यूतकिरणजालगलिततिमिरनिकराय, दुरन्तदुरितदूरीकरणचतुराय, सकलसिद्धिवुद्धिप्रदाय, ऋद्धिसन्धानसिद्धाय, सिद्धजनध्याताय, वरमोदकषण्डखण्डनासक्तशुण्डादण्डमण्डिताय, खण्डिताशेषपाषण्डमण्डलाय, अखण्डब्रह्माण्डमण्डनाय, पण्डिताय, सिन्धुरवदनाय
नमस्ते नमस्ते नमः ॥

[लयः- गजवदनऽऽ बेडुवे गौरीतनयऽऽ]

गजवदनऽऽ कामये गौरीतनयऽऽऽ ।
भुवनवन्दित भवभवभयनाशन
गजवदनऽऽ कामये ॥ ध्रु ॥

पाशांकुशधर परमपवित्रऽऽ ।
मूषकवाहन मुनिजनप्रेमऽऽ ॥

दर्शय पादमुदारमिदं तव ।
साधुवन्द्य परमादरणीयऽऽ ॥

सरसिजनाभ श्रीपुरन्दरविठलम् ।
मनसि नित्यमनुचिन्तये यथा ॥

[लयः– गजमुखने गणपतिये निनगे वन्दने]

गजमुख मामव सततं प्रणतमादरात्
कल्पतरुर्भासि भो भक्तजनानाम् ॥ ध्रु ॥

पावने भाद्रपदे शुक्लचतुर्थ्यां
प्रतिसदनं सदयमहो हर्षयसेऽस्मान् ॥

देव ते पादयुगे न्यस्तमस्तकान् ॥
पालयसे भक्तजनान् सक्तचित्तान् ॥

ऐहिकं सौख्यमथो पारलौकिकं
देव दया केवला भवति कारणम् ॥

तावकं सकलकलं मुखकलानिधिं
वीक्ष्य सपदि भवति भो जन्म पावनम् ॥

पार्वतीप्रेमपुत्र पाहि पापिनं
पङ्कपतितमापदां सर्वनिधानम् ॥

तावकं पादयुगं पद्मसन्निभं
भुवनपते भाति मां धर्मसाधनम् ॥

[लय:- हे प्रभो आनन्ददाता, ज्ञान हमको दीजिये]

हे प्रभो आनन्ददातः,
ज्ञानममलं देहि भो !
आशु नाशं दुर्गुणानां
नाथ कुरुषे सेवकानाम् ॥ हे प्रभो

पादयुगलं कमलमृदुलं
लालये मम मनसि विमलम् ।
सदयमव मां दुरितनाशन
विघ्ननाशन पाहि माम् ॥

रक्तकुंकुम सिक्तवपुषं
भक्तमानसजलजवासम् ।
त्वां नमामो देवशरणं
मधुरकरुणापूर्णहासम् ॥

हस्तिमुख मम मस्तके ते
वरदहस्तं स्थापयित्वा ।
अस्तमितभवदुःखजालं
कुरु सदा मां स्वस्तिमन्तम् ॥

[लयः– सिंगार गणपन भंगार मुखवन मंगल मंगलवेन्नू तिरी]

मन्दारसुमचयमन्दान्यमधुरससन्दोहसन्तानसन्दानितम् ।
वन्दारुसुरवरवृन्दार्चितं मनसि संधाय संधाय वन्दामहे ।
सखि, सन्धाय सन्धाय वन्दामहे ॥

नीलोपलाङ्कितभालाय वरशिवबालाय बालाय संलापिने ।
मालासमाकुलचेलाय मोदकलोलाय लोलाय तस्मै नमो ।
वद लोलाय लोलाय तस्मै नमः ॥

विघ्नाद्रिभेदनवज्राय धारितसत्याय सत्याय नित्यात्मने ।
राजाधिराजकृतपूजाय साधुजनवीराय धीराय नीराजये ।
सखि वीराय धीराय नीराजये ॥

* * *

श्रीराघवेन्द्रगद्यम्

अगणितकल्याणगुणगणशरणरमणीयरमारमणनारायणवरचरणकमलयुगलनिषेवणपरायण, महामहिममन्त्रालयावास, श्रीश्रीनिवासप्रसादसमासादिताशेषविशेषशेमुषीक, समीरसुतसमयसमुद्रसंवर्धन, सुजनमनःकुमुदिनीसंमोदन, सुधासान्द्र, निस्तन्द्र, चन्द्र, राघवेन्द्र, सुयमीन्द्रप्रभो !

पाहि माम्, पाहि माम्, पाहि माम् ।

भवरोगदूरीकरणचतुरचतुर्भुजचरणरजःकणपरिमलानुयाता, विमलमतिमयविषमनयनयुतविबुधजनशिरोभूषणायमाना, अमितमतिमारुतमतविततजलनिधिनिलीयमानविमलविसरा, श्रीमज्जयतीर्थसुधीवरधीमन्दरमथनसमुत्थितसकलसच्छास्त्रसारसुधारसव्यतिकरजनितमधुरिमरमणीया, रिङ्गत्तुङ्गतरङ्गसङ्गीतगीतगोविन्दगुणवृन्दा भवदीया दिव्यवचोनदी बहुदीनं मदीयं हृदयं विमलं विधाय तदनवरतममन्दानन्दकन्दमुकुन्दपदारविन्दद्वन्द्वे मिलिन्दायमानं कुर्यादिति सादरं सभक्तिभावं साञ्जलिबन्धं च संप्रार्थये ।

* * *

विजयीभव विजयीभव

राघवेन्द्र गुणसान्द्र साधुजनचन्द्र भूरि वरदेन्द्र ॥

धन्यगोपाम्बिकागर्भशुक्तिमुक्ताफल
दिव्यवीणाप्रवीणतिम्मणपुण्यफल
मध्वसिद्धान्तवार्धिसंवर्धन
दुर्वारवादिजनगर्वसंमर्दन
सुखवर्धन, विजयी भव, विजयी भव ॥

व्यासदासगुरुमध्वहासससमभास
दोषराशिनगनाशकारिहरिपादकमलयुगदास
अनवद्यविद्यावदातहृदयकोश
दूरीकृतविनतजनदोष
सुजनदोष, विजयी भव, विजयी भव ॥ २ ॥

नमनागतसुरवैमानिकशतसम्मानितवरचरित
करुणाविलनिजनयनांचलयुगदूरीकृतभवदुरित
श्रीसुधीन्द्रकरसंजात
नुतहरिपदजलजात
कृतदुर्जनगणघात, विजयी भव, विजयी भव ॥३॥

[लयः- गुरु पुरंदरदासरे निम्म चरणकमलव नंबिदे]

गुरु पुरन्दरदास ते पदकमलमहमुपलालये
गर्वरहितं कुरु सदा मां पालयेह भवालये ॥

पुरन्दरालयहट्टमध्ये नित्यवित्तविनिष्ठितम्
त्वामयाचत विप्ररूपो धनमसौ परपूरुषो ॥

किंचिदपि जाने न मन्दो ह्यवन्दे ते पदम्
इन्दिरेशं सपदि दर्शय वन्द्य कुरु मयि सत्कृपाम् ॥

अजभवादिकदेवमहितं विजयविठ्ठलं ध्यायसि
निजमतिं मे देहि गुरुवर भजनपूजनतोषितो ॥

* * *

संकीर्णगीतानि

स्वागतगीतम्

स्वागतं भो स्वागतम् ।
संस्कृतभाषाभूषितविदुषां, स्वागतं भो स्वागतम् ॥

संस्कृतभाषा सुललितघोषा
निर्मलवेषा विगलितदोषा ।
केषां नैषा कृतबहुतोषा
विलसति भारतभूतलभूषा ॥

विशालयशसा विसारिमहसा
प्रसादविकसितललितसंपदा ।
प्रसारयन्ती सुगन्धमसमं
विलसति सुमनोमनसि सदैषा ॥

शाला संस्कृतभाषायाः नित्यमेषाभिवर्धताम् ।
आशिषा विदुषामेषां शेमुषीलसितात्मनाम् ॥

* *

गीर्वाणवाणी

[लयः- उडुपि इदू उडुपि इदू, गीताचार्यर क्षेत्रविदू]

जयतु चिरं जयतु चिरं गीर्वाणानां वाणीयम् ।
वेदान्तोदितमाशु दिशन्ती मोक्षमार्गमतिरमणीयम् ॥

भावसुमधुरा वेदरूपिणी धर्मकर्मगतमर्मबोधिनी ।
साधुतोषिणी भाग्यपोषिणी वितरतु फलमिह सुखधानी ॥

भारतभूजनमनोहारिणी भारतभाषाप्रभवकारिणी ।
भाववाहिनी काव्यमोहिनी विलसतु कलरसपदवेणी ॥

नीतिनियमचयतत्त्वबोधिनी मुनिजनजीवनमार्गदर्शिनी ।
कीर्तिरूपिणी स्फूर्तिदायिनी विहरतु मम हृदि सुरवाणी ॥

* * *

गीता गीता भगवद्गीता ॥

गीता गीता यदा भगवता
भारतभूमौ सदा शुचिमता ।
तदा व्यथा सा पार्थमनोगा
जगाम विलयं सपदि विगीता ॥

आत्मा नित्यो हतेऽपि देहे
न याहि शोकं पालय लोकम् ।
शोकविमोकं कुर्वाणैवं
जयति भगवता गीता गीता ॥

पालय धर्मं लालय सुजनम्
परिहर सततं कामं क्रोधम् ।
मा कुरु सङ्गं क्वचन सरागम्
हत भवरोगं याहि विरागम् ॥

भक्तिः शक्ता शोकविमोके
ज्ञानं शक्तं भक्तिवर्धने ।
कर्मणि योगो ज्ञानसाधको
हृदये चिन्तय तदिदं तत्त्वम् ॥

कृष्णे सर्वं कर्म समर्पय
दोषविदूरो धारयतेऽसौ ।
मा कुरु चिन्तां मा कुरु दुःखं
याहि शरण्यं शरणं मुख्यम् ॥

नष्टो मोहः स्मरणं लब्धम्
संशयहीनं जातं चित्तम् ।
चकार वचनं केशवगदितम्
यदावदखिलं पाण्डववीरः ॥

* * *

।। संस्कृतगीतरामायणम् ।।

[ध्यः:- स्वये श्रीरामप्रभू ऐकती, कुशलव रामायण गाती]

निवेदक :-

स्वयं श्रीरामप्रभुः श्राव्यते
कुशलवरामायणगानम् ।।

कुमारकौ तौ समानरूपौ
शरीरमहसा रामसमानौ ।
सुतौ कथयतो निजपितृचरितं
तेजसा तेजोनीराजनम् ।।

तापसवेषौ नरपतिरूपौ
गन्धर्वसमौ तौ तपोवनीयौ ।
भावचयो बत मुनेर्विधत्ते
मानुषे रूपे संमोहनम् ।।

तौ प्रतिभाया रसालवनगौ
वसन्तवैभवगानविलोलौ ।
कलरवकुशलौ कोकिलबालौ
गायतो गानं स्वरशोभनम् ।।

कुसुमसमौ तावधरौ विकचौ
सुगन्धिता स्वरलहरी रुचिरा
कर्णभूषणौ दोलालोलौ
सज्जतं वीणाझङ्कारणम् ।।

स्वर्गमार्गके स्वरसप्तकजा
नवा रसानां नव याः सरितः ।
यज्ञमण्टपे समागतास्ताः
सङ्गमे जातं जनमज्जनम् ॥

पुरुषार्थानां चतुष्टये या
दृष्टा जीवनगाथा गीता ।
प्रत्यक्षादपि सा रसभरिता
प्रभोरपि बाष्पचित्तं लोचनम् ॥

सामवेदमिव बालौ वदतः
सर्गाननु नवसर्गं पठतः ।
मनो विचलितं तदा जनानां
स्यन्दते बाष्पं संरोधनम् ॥

हित्वा स्वासनमुदगाद्रामो
आलिलिङ्ग निजशैशवममलम् ।
पुत्रमिलनजो महो महानपि
न च तदा केषामपि बोधनम् ॥

* * *

[लयः- सरयूतीरावरी, अयोध्या मनुनिर्मित नगरी]

कुशलवौ —

सरयूतीरवरे
अयोध्या रेजे रम्यतरे ॥
सा नगरी या विशालभवना
शिल्पकल्पना यत्र सुन्दरा ।
मध्ये गच्छति मार्गः सरलो
रथवाजीर्गजपथिकसमूहो गच्छति यस्यान्तरे ॥
गृहे गृहे किल रत्नतोरणं
समन्ततो वत रम्यसुपवनम् ।
तत्र वर्तते नृत्यगायनं
मृदङ्गवीणे नित्यं नदतः चित्ते सरसान्तरे ॥
स्त्रियः पतिपराः पुरुषः प्रयतः
पुत्रजनो निजवंशदीपकः ।
न कोऽपि दुष्टो नापि नास्तिको
न चाप्यतृप्तो बभूव मर्त्यो हृदये नगरान्तरे ॥
राघवकुलकलकीर्तिभूषणः
राजा दशरथनामा सुजनः ।
समभून्नगरीरक्षणनिपुणः
गृहे चन्द्रवत् सदसि चेन्द्रवत् सूर्यसमः सङ्गरे ॥

दशरथस्य यास्तिस्रो भार्याः
सुवंशजाताः सम्रुचितचर्याः ।
गृहीतनिजपतिसेवाकार्याः
बहुश्रुता बत रूपशालिनीरासन् सदनान्तरे ॥

तासां मधुरे प्रीतिसङ्गमे
लोकत्रयसुखमासीत्सदने ।
एकमूनमथ गृहस्थाश्रमे
पुत्रोदयसुखविरहवैशसं सरसे प्रीत्यन्तरे ॥

शल्यमिवासीत्कौसल्यायाः
सदा सुमित्राप्युदासचित्ता ।
कैकेयी व्रतान्यकरोत् सततं
दशरथस्य च व्यथा सुमहतीं तुदति स स्वान्तरे ॥

राज्यमिष्यते प्रजासुखेभ्यः
एका चेतसि चिन्ताऽनन्ता ।
किं प्रयोजनं राज्यधनैर्मे
कल्पतरुर्हा कुतो न सुमितो वसन्तमासान्तरे ॥

* * *

(लय- उगां कां काळिज माझे उले ?)

कौसल्या—

वृथा किं दूनं मे मानसं
जायते दृष्ट्वा लतिकासुमम् ॥

कदापि नैवं विकलमान्तरं
नान्वभवं वा मनसि मत्सरम् ।
अद्य किं व्यथयति सुमवैभवम् ॥

हे मम मानस किं ते दयितं
नैव लालयसि हरिणशावकम् ।
मुञ्चतो मुधैव नेत्रे जलम् ॥

दृष्ट्वा गामथ वत्ससमेतां
जायते कुतो मत्सरभावो ।
विदीर्णं मौनयुतं चान्तरम् ॥

कापि पक्षिणी शिशुं रमयते
दृश्यमिदं मां कुतो व्यथयते ।
किमेवं विपरीतं चिन्तनम् ॥

कुतो वृथा मां प्रतारयसि रे
विना सुतं नहि पूर्णा नारी ।
जायते विफलं ननु जीवनम् ॥

मूर्तिरुद्‌यते पाषाणादपि
कौसल्या किं ततोऽपि हीना ।
चिन्तया मथितं मे मस्तकम् ॥

न किं पुराणं नभःप्राङ्गणं
तदपि जनयते तारकागणम् ।
अकारणमुदितं मे जीवनम् ॥

* * *

(लय:- दशरथ ! घे हे पायसदान)

यज्ञपुरुषः—

दशरथऽऽऽ ! क्षीरं धरतु भवान्,
तव यज्ञेऽहं प्रकटो जातस् त्वं राजाऽसि महान् ॥

तव यज्ञोऽयं पूर्णतां गतः
तृप्ता जाताः सर्वदेवताः ।
प्रसन्नवदनो महीपते त्वयि श्रीविष्णुर्भगवान् ॥

श्रीविष्णोरित्थमाज्ञा शिरसा
मया धारिता प्रसादसरसा ।
अमुं प्रसादं विहाय भुवने नान्यः कोऽपि महान् ॥

गृहाण पाणौ सुवर्णकलशं
तव पत्नीभ्यो देहि पायसम् ।
कामधेनुनवदुग्धादपि खलु सारोऽयं बलवान् ॥

कृत्वा पायसभक्षणमनघं
धारयन्ति ता गर्भममोघम् ।
जनयिष्यन्ति च चतुरः पुत्रान् रामो येषु महान् ॥

जनयेयुस्तास्तिस्रो देव्यः
श्रीविष्णोरमलांशसंभवान् ।
सुतान् गुणयुतान् दशरथ राजन् भवसि त्वं सुतवान् ॥

कृतकृत्यस्त्वं विभासि वदने
कृतकृत्योऽहं भवद्दर्शने
देह्याज्ञां नृप गन्तुमग्रतो लोकान् नाकगतान् ॥

* * *

(लय:– चैत्रमास त्यात शुद्ध नवमी ही तिथी)

अयोध्यावासिन्यः स्त्रियः—

चैत्रमासशुक्लपक्षनवमसत्तिथौ
गन्धयुक् तथापि वात एष तापितो ।
प्रहरयुगे स्तिमित एष शिरसि भानुमान्
रामजन्मसमय एष हर्षदो महान् ॥

कौसल्या मन्दस्मितो दिशति लोचने
भवति दीप्तिदीपिता तनयदर्शने ।
निःसरते बाष्प एष मधुरमोदवान्
रामजन्मसमय एष हर्षदो महान् ॥

प्राङ्गणगो धेनुगणो मोदसंकुलो
दुंदुभिजो निनद एष नदति सर्वतो ।
राजगृहे भाति जनो बहुलभाग्यवान्
रामजन्मसमय एष हर्षदो महान् ॥

आतपोपतापिताः कुसुमकोरकाः
किं किमित्यसमये विकसितास्तदा ।
उच्चरवो वायुरेवमाह गन्धवान्
रामजन्मसमय एष हर्षदो महान् ॥

वार्तेयं सुखजननी जनतया श्रुता
राजपथे केऽपि तदा सपदि धाविताः ।
युवतीनां कोऽपि चयो चलति गीतिमान्
रामजन्मसमय एष हर्षदो महान् ॥

पुष्पाण्यथ किरति कोऽपि कोऽपि भूषणं
हास्यध्वनिजातलयं भवति भाषणम् ।
वाद्यानां निनद एष सपदि वृद्धिमान्
रामजन्मसमय एष हर्षदो महान् ॥

नूपुरेषु विलयमाप वाद्यनिक्वणो
गोमुखादिनिस्वनोऽपि बहुसमेधितो ।
आम्रतरौ सपदि पिको भवति मौनवान्
रामजन्मसमय एष हर्षदो महान् ॥

गगनांगणमद्य नवं भाति रञ्जितं
मुक्तानां चूर्णमहो नभसि सन्ततम् ।
चित्रमिदं पश्यति भो दिग्गजो महान्
रामजन्मसमय एष हर्षदो महान् ॥

मग्नमिदं नगरमहो नृत्यगायने
मग्नेयं तालल्ये भाति मेदिनी ।
चलति साऽपि भोगिराड्भवति भारवान्
रामजन्मसमय एष हर्षदो महान् ॥

वदति माधवो मधुरया गिरा
लिखति पट्टके सरलरेखया ।
पठति पुस्तकं सावधानतो ।
हरति चेतसं नन्दगोपतेः ॥

व्रजति गोव्रजं गोपबालकैः
सह वनान्तरे खेलति प्रभुः ।
धरति मस्तके बर्हमद्भुतं
वहति कटितटे पुरटपट्टकम् ॥

लुठति गोकुले धूलिधूसरो
रटति गीतिकां गुरुजनोदिताम् ।
नटति बहुविधं नाट्यकोविदो
विशति परगृहं बाललीलया ॥

लसति तरुतले भुवनमोहनो
हरति सन्मनो वेणुनादतः ।
तुदति दुर्जनान् अवति सज्जनान्
जयति यदुकुले विश्वनायकः ॥

व्रजामि राममंदिरं नमामि पादपङ्कजम् ।
स्मरामि राममद्भुतं जपामि नाम मङ्गलम् ॥

पठामि वेदवाङ्मयं वदामि माधवस्तुतिम् ।
पिबामि तीर्थजं जलं सरामि साधुसङ्गतिम् ॥

वहामि माधवं हृदा सहायकं सदा सताम् ।
दहामि कामलोभजं मनोमलं तपस्यया ॥

त्यजामि नश्वरं सुखं भजामि देवमीश्वरम् ।
सृजामि काव्यगीतिकां व्रजेशपादसेविकाम् ॥

जयामि दुर्जयानरीन् तथापि कालमुत्तमम् ।
यक्षामि दिव्यसंपदं प्रयामि पारमापदाम् ॥

* * *

विहरसि वनभुवि हरसि मनो नः ।
वितरसि परसुखमवसि हरे नः ॥

क्षिप्यसि नृत्यसि हससि कदाचित
पश्यसि कुप्यसि विशसि वनान्तः ।
धावसि माद्यसि पतसि विमुह्यसि
कलयसि भयमपि सपदि हृदन्तः ॥

पृच्छसि किंचित्, यच्छसि किंचित्
गच्छसि कुपितो बोधसि सकलम् ।
अश्रु विमुंचसि सिंचसि वदनं
चंचल चलसि विसंष्ठुलचरणम् ॥

तुष्यसि हृष्यसि लुट्यसि समदं
लुभ्यसि हरसि नवं नवनीतम् ।
श्राम्यसि, शाम्यसि, शंससि यमुनां
जल्पसि तिष्ठसि गायसि गीतम् ॥

* * *

कलये जगदीशं श्रीशं, कलये जगदीशम् ।
धारयामि हृदि यदुकुलनाथम् ।
लालयामि हरिचरणसरोजम् ।
क्षालयामि सकलं मलजातम्
कल्पयामि परिचरणममोघम् ॥
महसि रमे सुखपरमे विरतिकृते सपदि यते ।

घोषयामि हरिगुणगाथाम्
भूषयामि वपुररिदरचिह्नैः ।
तोषयामि भुवि सुजनसमाजं
जोषयामि विषयाभिनिवेशम् ॥
जगति लभे नरकनिभे विकलजने न खलु सुखम् ।

कलये जगदीशं श्रीशं कलये जगदीशम् ।

* *

(लयः– दसरे बंदिहुदेन्दू व्हस्तू चेतन तंदू)

विजयादशमी प्राप्ता नूतनतामधुनाऽऽप्ता ।
नवमिव भुवनं जातं दिव्या कान्तिरियम् ,
दिव्या कान्तिरियम् ॥

अद्य वयं साधु दिने साधुजनैः साकमिताः ।
सरसं याम सामपदं दत्ता शमीयम् ,
दत्ताऽऽ शमीयम् ॥

जीवामो बहुकालम् , विहरामो बहुकालम् ।
विमलं याम सामपदं दत्ता शमीयम् ,

दत्ताऽऽ शमीयम् ॥
भावधनं बहुकमनं नाकसदामपि गहनम् ।
ललितं याम सामपदं दत्ता शमीयम् ,
दत्ताऽऽ शमीयम् ॥

प्रणमामो गुरुचरणे ध्यायामो हरिचरणे ।
सुगमं याम सामपदं दत्ता शमीयम्
दत्ताऽऽशमीयम् ॥

* * *

॥ यष्टिगानम् ॥

नन्दनन्दन एष विशति सरसमालयम् ।
रामसहित एति सपदि वरय वरचयम् ॥

मकरकुण्डलनीलरत्नकटकभूषणम्
रुचिरहारसहितपुरटवरकिरीटिनम् ।
नुमो दिव्यमृदुलचारुवसनवेष्टितम्
वदनकमलमुकुलहाससरससुखयुतम् ॥

नाभिकमलजनितभुवनजनकदैवतम्
चारुपादकमलयुगलदलितवैशसम् ।
नुमो रासलासकुशलगोपबालकम्
नाट्यरसावेशजातसरससुखयुतम् ॥

नीलजलदविमलदेहकान्तिशोभितम्
धेनुनिवहसहितममितमनणुगुणयुतम् ।
नुमो रुचिरबर्हनिचितचारुमूर्धजम्
गोपबालकेलिजनितसरससुखयुतम् ॥

नन्दनन्दन एष विशति सरसमालयम् ।
रामसहित एति सपदि वरय वरचयम् ॥

* * *

॥ राधाकृष्णसंवादः– प्रीतिकलहः ॥

कृष्णः– अयि राधे, मम कामं तमिदानीं कुरु सकामम्,
हृदयं मे बहुकोमलम्, ए भामे ! हृदयं मे बहुकोमलम् ॥

राधा– तव हृदयं बहु परुषं जनयति मे मनसि रुषं,
नहि जाने तव कामितं, अयि वेणुक ! नहि जाने
तव कामितम् ॥

कृष्णः– जहि मानं कुरु सरागं मदनभावादधरदानं,
तव वदनं मम जीवनम्, ए राधे ! तव वदनं मम
जीवनम् ॥

राधा– अलमेवं तव वचनं गोपीनामतिरुचितम्,
नैवेदं मम मोहदम्, ए मोहन ! नैवेदं मम मोहदम् ॥

कृष्णः– त्यज राधे तव कोपं न कुरु काले सुखविलोपं,
मदनोऽयं बहुदीपनो, ए भामे ! मदनोऽयं बहुदीपनो ॥

राधा– इयं गोपी मुदा पीना, रुचा हीना तवाधीना ।
त्वामेवं प्रतिवीक्षते, ए मोहन ! त्वामेवं प्रतिवीक्षते ॥

कृष्णः– तव समाना ललितवरुना नैव काचन भाति भामा ।
वचनं मे शृणु राधिके, ए भामे ! वचनं मे शृणु राधिके ॥

राधा– कुरु करे मम करतलं ते, कथय चैवं सशपथं माम् ।
प्रणयस्ते मयि केवलम्, ए मोहन ! प्रणयस्ते मयि
केवलम् ॥

* * *

(लयः- सुनो सुनो हे दुनियावालों बापूजीकी अमरकहानी)

श्रृणोतु जनता भारतभूषणगान्धिमहाशयजीवनगाथाम् ।
गंगाजलपमनिर्मलहृदयो विसारिसौरभकीर्तिसुमो,
विकसितसुन्दरनीरजवदनः ।
शान्तिशशाङ्को भारतभानुः, बभूव पूज्यो बापूजी ॥

सत्यमहिंसातत्त्वमन्ततो विबोध्य भूयो भूमितले
सत्याग्रहजां क्रान्तिमादधे ।
'रघुपतिराघवराजाराम पतितपावन सीताराम'
प्रार्थनामिमां गायन् सततं
जिगाय भुवनं बापूजी ॥

भाति धीरता दूरदर्शिता मानवीयता किं च साधुता,
सतां समुदये समापादिता ।
तदा यदाऽभूद्भारतभूमौ राष्ट्रपिताऽसौ बापूजी ॥

* * *

अद्य विद्यते बालदिनं बालदिनम्
चाचा-जवाहर-जन्मदिनं जन्मदिनम् ॥

संस्कृतगीतं गायामो
वयं विहायसि विहरामो
हृदा वहामो भावधनं, भावधनम् ॥

पाटलसुममिव सामोदं
जीवनवनभुवि विकसामो
भारतमातुः सुता वयं, सुता वयम् ॥

भारतगौरवगानमहो
सदा मुदा हृदि कलयामो
धारयामहे मानधनं, मानधनम् ॥

* *

नगरे नगरे ग्रामे ग्रामे विलसतु संस्कृतवाणी
सदने सदने जनजनवदने वसतु चिरं कल्याणी ।

सत्यशीलसौन्दर्यसमीरा ज्ञानजला गतिसारा
कल कल छल छल प्रवहतु दिशि दिशि पावन संस्कृतधारा ॥

* * *

(लय– इस मिट्टी से तिलक करो ये धरती है बलिदान की)

वीर बालका वीरबालकाः स्वतन्त्रतापरिपालकाः ।
वीरजवाहरसमा नायका वयं भवामो बालकाः ॥

बभूव भव्यो भारतभूमौ सर्वचराचरपालको ।
लोकमनोगतशोकविमोको भारतरभसंचालको ॥

वन्दे माधवम्, वन्दे माधवम् ।

सुषुवे भारतमाता तनयं दिव्यबुद्धिबलभूषितम् ।
सुभाषचन्द्रं सद्गुणसान्द्रं देशभक्तिरसपूरितम् ॥

वन्दे नायकं वन्दे नायकम् ।

देशसङ्घटनकर्मसाधको लोहपुरुष इति कीर्तितो ।
भूव वल्लभभाई पटेलो भारतजनतालालितो ॥

वन्दे नायकं वन्दे नायकम् ।

मानवसेवाभावभूषितो भारतभूतलभूषणो ।
बभौ महात्मा गान्धिनामको नित्यसत्यबलपोषणो ॥

वन्दे नायकं वन्दे नायकम् ।

शिष्टरक्षको दुष्टशिक्षको वीरजवाहरनायको ।
चाचाबालजनप्रियरूपो बभूव लालितबालको ॥

वन्दे नायकं वन्दे नायकम् ।

* * *

(लय: दे दी हमे आजादी बिना खड्ग बिना ढाल)

दत्ता स्वतन्त्रता खलु शस्त्रैर्विना कृता ।
साबरमतीनिवासकृता गान्धिना सता ॥

जातो हिताय सदा देशवासिनाम्,
देशाभिमानभानुरसौ भाति दीप्तिमान् ॥

संभावितो हि भूरि भवान् भारतावनौ
भव्यं बिभर्ति धाम हृदा रामनामकम् ॥

नेता स्वयं निनाय जनान् नीतिमार्गतो,
जेता यतो बभूव सदा सिद्धिसंगतो ॥

यातो न जातु भाति भवान् भव्यभारतात्
जातो यतो यशोवपुरभरो जनान्तरे ॥

* * *